# Shri Mahalasa Sahasranamavali Stotram

# श्रीमहालसा सहस्रनामस्तोत्रम्

## Document Information

Text title : Mahalasa Sahasranama Stotram

File name : mahAlasAsahasranAmastotram.itx

Category : devii, sahasranAma

Location : doc_devii

Transliterated by : NA

Proofread by : NA, PSA Easwaran

Description/comments : See corresponding nAmAvalI

Latest update : March 23, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2021

*sanskritdocuments.org*

# श्रीमहालसा सहस्त्रनामस्तोत्रम्

श्रीगणेशाय नमः । श्रीमहालसायै नमः ।

ऋषय ऊचुः -
साधो जीव चिरं सूत त्वं न आनन्ददाः कथाः ।
कथयस्वामृतप्रख्या भवतापहराः शुभाः ॥ १॥

अथान्यत्कथयास्मभ्यं मनःश्रुतिसुखं सखे ।
भुक्तिमुक्तिप्रदं विष्णुप्रीतिदं स्तोत्रमुत्तमम् ॥ २॥

सूत उवाच -
साधु पृष्टं द्विजश्रेष्ठाः स्मारितोऽहं हितैषिभिः
व्यासान्मया श्रुतं ब्रह्मा नारदायाब्रवीत्पुरा ॥ ३॥

कदाचिन्नारदो योगी त्रिलोकान्पर्यटन्मुनिः ।
गायन्विष्णुं दधद्वीणां सत्यलोकं ययौ मुदा ॥ ४॥

विविक्तेऽजं स्थितं वीक्ष्य जपन्तं वाग्यतं विभुम् ।
पप्रच्छ कुतुकान्नत्वा ब्रह्माणं स पुनःपुनः ॥ ५॥

नारद उवाच -
देव कर्तास्य विश्वस्य पातासि त्वमजः परः ।
त्वमेकान्ते किं जपसि तेन मे संशयो महान् ॥ ६॥

ब्रह्मा उवाच -
साधु पृष्टं त्वया वत्स संशयो माऽस्तु ते मुने ।
यतश्चराचरमभूतत्सर्वं सत्यं यतोह्यहम् ॥ ७॥

नाभ्यब्जादभवं विष्णोराराध्यो जनकः स मे ।
सृष्टिमोहापनुत्यै तं स्तोत्रेण स्तौमि नित्यशः ॥ ८॥

तस्य धर्मस्थितिकरा मूर्तयोऽसुरनाशकाः ।
अधर्मोपशमा वक्तुमलं नाहं भवोऽपि न ॥ ९॥

पुरा देवासुरैर्यत्नान्मथिते क्षीरनीरधौ ।
द्विःसप्त रत्नान्यभवञ्छ्रीः सुधेन्दुर्मणिः सुरा ॥ १०॥

दैत्या जह्रुः सुधाकुम्भं ततोऽभूद्दुर्मना वृषा ।
शरणं मामनुप्राप्तो मयाऽपि हरिरीडितः ॥ ११॥

तुष्टोऽसौ मोहिनी नाम स्त्री बभूव महालसा ।
महती चालसा दूरात्तान्वीक्षन्ती सुरासुरान् ॥ १२॥

अनिर्देश्यवपुः सत्यज्ञानानन्दमयी शुभा ।
तां दृष्ट्वा मुमुहुश्चोचुस्ते देवि विभजाखिलम् ॥ १३॥

तयाऽथ तर्पिता देवाः सुधया सुरयाऽसुराः ।
रवीन्दुमध्यगं राहुं ज्ञात्वामृतकरं हरिः ॥ १४॥

छित्त्वा चक्रेण द्विरूपं दृष्ट्वा शीर्ष्ण्यदधात्पदम् ।
तामहं स्तौमि वरदां मोहिनीं श्रीमहालसाम् ॥ १५॥

नाम्नां सहस्रैर्जननीं सृष्टिज्ञानप्रदां पराम् ।
तद्गोप्यमति ते पुत्र कथये शृणु नारद ॥ १६॥

विष्णुमूर्तिरजा देवी मोहिनी श्री महालसा ।
सर्वदेवमयी माता त्रिगुणा परमेश्वरी ॥ १७॥

तस्या नाम्नां सहस्रं ते दिव्यं वच्मि शुणुष्व तत् ।
पुष्टिदं तुष्टिदं भुक्तिमुक्तिदं मोहनाशनम् ॥ १८॥

मातृकाक्रमसाहस्रं सर्वनामामृतं शुभम् ।
भक्तियुक्तः शुचिर्भूत्वा जपेत् श्रीमूर्तिसन्निधौ ॥ १९॥

हृदि ध्यात्वाऽधिदेवं च विष्णुमेतज्जपेन्मनुम् ।
चिच्छक्तिधर्मकामार्थमोक्षेषु विनियोज्यते ॥ २०॥

अस्य श्री महालसासहस्रनामस्तोत्रमन्त्रस्य शिवऋषिः ।
श्रीविष्णुमूर्तिमोहिनी श्रीमहालसा देवता । अनुष्टुप् छन्दः ।
ह्रीं बीजम् । क्लीं शक्तिः । सर्वज्ञा सर्वशक्तिश्चेति कीलकम् ।
चिच्छक्तिधर्मकामार्थमोक्षप्राप्त्यर्थं श्रीमहालसाप्रीत्यर्थे जपे
विनियोगः ।

अथ ध्यानं -
अरुणामतिपीतवाससां धृतकार्तस्वरचारुभूषणाम् ।
अतिरम्यवपुश्चतुर्भुजामनिशं नौमि महालसां शुभाम् ॥

उद्यद्भानुसहस्रदीप्तिवपुषां जाम्बूनदालङ्कृताम् ।
ब्रह्मेन्द्रादिसुरैः स्वमौलिमणिभिर्नीराजितश्रीपदाम् ॥

भक्ताभीष्टफलप्रदां च दधतीं हस्तैश्च कौक्षेयक-
शूलामित्रशिरांसि राहुमथिनीं ध्यायेत्सदा मोहिनीम् ॥

इति ध्यानं-
ओङ्काररूपा नम्या च नयनानन्ददायिनी ।
नित्या नतिप्रिया नन्दा महादेवी महेश्वरी ॥ १॥

महालसा विष्णुशक्तिर्महामाया महालया ।
सिद्धिर्धीरमृता नन्दाऽऽनन्दाऽऽकूतिरनिन्दिता ॥ २॥

आढ्याऽऽर्याऽभयाऽशक्याऽजयाऽजेयाऽमलाऽमरा ।
अमूर्तिरदितिश्चार्याऽऽदित्यमाताऽगुणाऽवनिः ॥ ३॥

आनन्दिन्यसुरघ्न्यर्च्या रूपवत्यमृतप्रसूः ।
आकाररूपाऽयोध्याऽसुरच्छिदमरवल्लभा ॥ ४॥

अखण्डितायुरनघा चालिराजिरहस्करा ।
आमयघ्न्यलकाऽनेका चाहल्याऽभीतिरक्षया ॥ ५॥

अन्नपूर्णाऽनसूयाऽग्र्याऽशुभघ्नी चाजवन्दिता ।
आद्याऽभयप्रदाऽरूपाऽजरा चामलविग्रहा ॥ ६॥

आराध्याऽऽशापुरी चार्तिनाशिन्यमरवन्दिता ।
अनाकाराऽतुलाऽभीष्टा चाशेषाऽभीप्सितप्रदा ॥ ७॥

अप्रमेयाऽरुणाऽलक्ष्याऽद्वैताऽमूर्ताऽच्युताऽऽकृतिः ।
अष्टसिद्धिप्रदाऽनर्घ्यकौस्तुभा मुक्तकन्धरा ॥ ८॥

अनन्तशक्तिरज्ञेया चाणुरूपाऽरुणाकृतिः ।
अवाच्याऽनन्तरूपा चापूर्वाऽनाद्यादिरीश्वरी ॥ ९॥

इष्टेष्टदा तथेन्द्राणी चेशेशानीन्द्रमोहिनी ।
इलेशानमदघ्नी च ईशानवरदेन्दिरा ॥ १०॥

इच्छेषत्फुल्लकमललोचनेन्दीवरप्रदा ।
इडेभास्यनुतेशानप्रिया चेन्दुनिभानना ॥ ११॥

इडेन्द्रादिस्तुतेन्द्राणी वरदेड्येन्दिरेश्वरी ।
उत्तमोत्कृष्टवर्णोर्वी चोमोर्वश्युदयप्रभा ॥ १२॥

ऊतिरुद्यद्भानुकोटिप्रभा चोभयतोमुखी ।
उरगेन्द्रशयोत्केलिरुरुशक्तिरुरुप्रदा ॥ १३॥

ऊर्ध्वकेशी चोरुदेहा चोष्ठोद्धृतवसुन्धरा ।
ऊर्णावासोन्नताकाररूपोन्नद्धमदापहा ॥ १४॥

ऋतुपर्णार्चिता ऋद्धिर्ऋतुपुष्पा ऌकारिका ।
एकैश्वर्यप्रदा चैन्द्री चैन्दव्योङ्कारसंस्थिता ॥ १५॥

ओषध्यन्नप्रदात्री च औषधिश्चौर्ववन्दिता ।
अन्तर्वर्त्यम्बिका चाम्बालिकाम्बुधिशयाम्बुधिः ॥ १६॥

अन्तकघ्नी चान्तकर्त्री चान्तिमान्तकरूपिणी ।
अम्बुदाम्बरसंस्थाङ्का चाशेषस्वरभूषिता ॥ १७॥

काम्या कामप्रदा कृष्णा कल्याणी कल्पकारिणी ।
काली कला कलिहरा काशिः कलिमलापहा ॥ १८॥

कम्बुग्रीवा कलाकेलिः कमलाक्षी कलानिधिः ।
कावेरी कुलकान्ता च कौमारी कलिका कथा ॥ १९॥

केतकी कुलजा कन्या कलकण्ठी कवित्वदा ।
कामबीजवती कान्तिः कोटिः केलिः कुहू कृतिः ॥ २०॥

कमला कलभोरुश्च कामाक्षी कमनीयभ्रूः ।
कलङ्करहिता कान्ता कुशला कुटिलालका ॥ २१॥

काष्ठा कला कुरुक्षेत्रभूमिः कलितदानवा ।
कुल्या कलावती कीर्तिः केशिघ्नी कीर्तिदायिनी ॥ २२॥

कविप्रीता च करुणा कृपा काश्मीरवासिनी ।
कादम्बरी कलरवा कुचमण्डलमण्डिता ॥ २३॥

कौशिकीकृतमाला च कौशाम्बी कोशवर्धिनी ।
कुशावर्ता कामधेनुः कपिला च कुलोद्भवा ॥ २४॥

कुङ्कुमाङ्कितदेहा च कुमारी कुङ्कुमारुणा ।
काशपुष्पप्रतीकाशा कालमारी च कालिका ॥ २५॥

किरणा कल्पलतिका कल्पसङ्ख्या कुमुद्वती ।
काश्यपी कुतुका कुध्रा कृशाङ्गी कायवर्जिता ॥ २६॥

कामिनी कुन्तहस्ता च कुलविद्या च कौलिकी ।
काव्यशक्तिः केलिपरा कलहा कान्तिलोचना ॥ २७॥

काञ्ची कनकधारा च कलिः कनककुण्डला ।
कमलस्रग्धरा कामवरदा कमलाकृतिः ॥ २८॥

काञ्चीकलापरम्या च कमलासनसंस्तुता ।
कम्बीजा कौत्सवरदा कामरूपनिवासिनी ॥ २९॥

खड्गिनी खड्गहस्ता च खट्वाङ्गवरधारिणी ।
खेटहस्ता खड्गधरा खनिः खस्था खलापहा ॥ ३०॥

खगमाता खगाख्यातिः खगेन्द्रवरवाहना ।
खुराभिघातसैन्यघ्नी खेचरी खेटकामदा ॥ ३१॥

खरदूषणहन्त्री च खरस्पर्शा खरूपिणी ।
गीता गीतप्रिया गीतिर्गायत्री गौतमीगुरुः ॥ ३२॥

गुणाध्यक्षा गुणवती गोपीचन्दनचर्चिता ।
गङ्गा गोप्त्री गुणाढ्या गौर्गणेशा गीश्च गोपिका ॥ ३३॥

गोवर्धनधरा गुर्वी गोकुलाभयदायिनी ।
गण्डकी गौतमी गाथा गया गौरी गणेशसूः ॥ ३४॥

गोदावरी गोस्वरूपा गौतमाख्यमुनिस्तुता ।
गानप्रिया च गम्भीरा गेया गन्धर्वसेविता ॥ ३५॥

गान्धर्वी गीतकीर्तिश्च गेयविद्याविशारदा ।
गम्भीरनाभिर्गरिमा गुणरूपा गुणोद्धता ॥ ३६॥

गोपालरूपिणी गोष्ठी गहना गोधनप्रदा ।
गन्धप्रिया गोपसखी गारुडी गोहिता गतिः ॥ ३७॥

गोप्या गुरुतमा गम्या गोदा गुरुसुतप्रदा ।

घण्टानादप्रिया घोरा घोरदैत्यविनाशिनी ॥ ३८॥

घण्टा घोरवपुर्धृष्टदैत्यवक्षस्थला घृणिः ।
घटस्तनी घण्टिका च घटोघ्नी घटजन्मसूः ॥ ३९॥

घोषा घृताहुतिर्घासा घोरघर्घरनादिनी ।
ङ्काराकृतिसंविष्टा चतुष्कोणसबिन्दुका ॥ ४०॥

चारुश्चन्द्रप्रभा चञ्चुश्चतुराश्रमपूजिता ।
चतुर्वेदमयी चित्तिश्चित्स्वरूपा चराचरा ॥ ४१॥

चित्रिणी चक्रिणी चित्रा चित्राभरणभूषिता ।
चाणूरमर्दिनी चण्डा चण्डहर्त्री च चण्डिका ॥ ४२॥

चिदात्मिका चतुर्वर्गफलदा चतुराकृतिः ।
चकोराक्षी चारुहासा चमरी चतुरानना ॥ ४३॥

चतुःषष्टिःश्रीसुतन्त्रपूजनीया च चित्सुखा ।
चिन्त्या चक्षुश्चन्द्रभागा चपला चलकुण्डला ॥ ४४॥

चतुःषष्टिकलाज्ञानदायिनी चाक्षुषी मनुः ।
चर्मण्वती चन्द्रिका च चन्द्रमाता च चापिनी ॥ ४५॥

छत्रछाया छत्रवती छात्रबुद्धिप्रदा छविः ।
छायाग्रहहरा छाया छद्मदैत्यविनाशिनी ॥ ४६॥

जया जयन्ती जयदा जगत्त्रयहितैषिणी ।
जातरूपमयी ज्योत्स्ना जनता जातवत्सला ॥ ४७॥

जगती जङ्गमा ज्येष्ठा जन्मदा ज्वलितद्युतिः ।
जगज्जीवा जगद्वन्द्या जरामृत्युविनाशिनी ॥ ४८॥

जैत्री जीमूतसङ्काशा जीवना जीवनप्रदा ।
जितश्वासा जितारातिर्जनित्री जनमोहिनी ॥ ४९॥

जलमूर्तिर्जगद्बीजा जननी जन्मनाशिनी ।
जगद्धात्री जितेन्द्रा च ज्योतिर्जाया जनेष्टदा ॥ ५०॥

जीर्णा च जनमाता च जन्या जनकनन्दिनी ।
जालन्धरहरा जातिर्जनलोकनिवासिनी ॥ ५१॥

जयाजय्या जयकरी जरायुर्जवना जविः ।
जाम्बूनदविभूषा च ज्वाला जम्भवधोद्यता ॥ ५२॥

झल्लरी झङ्कनिर्झम्पा झणझ्झणितनूपुरा ।
झङ्काररूपा झटितिवरदा झर्झरी झरिः ॥ ५३॥

ङ्काराकृतिसंव्यक्तिः कर्णिकाकुसुमाक्षरा ।
टङ्कहस्ता टङ्कृती च टीका टङ्कारभीषणा ॥ ५४॥

ठरूपा ठाकृतिर्डिम्भा डामरी डमरुप्रिया ।
ढौकिताशेषपाताला ढुण्ढिपूज्या ढरूपिणी ॥ ५५॥

णकाराकृत्यनुस्यूतेभदन्ताक्षमालिनी ।
ताम्रपर्णी तीर्थमयी तापसी तापसप्रिया ॥ ५६॥

त्रैलोक्यपूजिता तारा त्रिपदा तोमरा त्रुटिः ।
तन्तुस्त्रयीतनुस्तापी त्रिपथा त्र्यम्बकस्तुता ॥ ५७॥

तुला तामरसाभास्या त्रिलोकस्था त्रिविक्रमा ।
तमालदलरुक् तन्वी तरुणी तामसी तरी ॥ ५८॥

तत्त्वतुष्टा तत्त्वरूपा तमोहन्त्री त्रिशक्तिधृक् ।
तपस्विनी तपोयुक्ता तपस्विकुलवन्दिता ॥ ५९॥

तापापहन्त्री च तार्क्ष्यमाता तृप्तिस्त्रपा तृषा ।
तपःसिद्धिस्तपोनिष्ठा तृप्ता तापितदानवा ॥ ६०॥

थाथाथैथैथरीथारतालविद्याविशारदा ।
दया दयानिधिर्दुःखहन्त्री दान्ता द्रुतेष्टदा ॥ ६१॥

दात्री दीनार्तिशमनी दैत्यदर्पविनाशिनी ।
द्वारका दरपाणिर्दृग्दिव्या दिग्दमितेन्द्रिया ॥ ६२॥

दक्षा च दक्षिणा दीक्षा दीक्षिता दक्षपूजिता ।
दीर्घकेशी दीर्घनिद्रा दयालुर्दनुजापहा ॥ ६३॥

दारिद्र्यनाशिनी द्यौश्च दिङ्मण्डलविकासिता ।
द्रौपदी देवमाता च दुर्धर्षा दीधितिप्रदा ॥ ६४॥

दशाननहरा दोला द्युतिर्दीप्ता दितिर्दनुः ।
दिवागतिर्दर्पहरा दीप्तपावकलोचना ॥ ६५॥

दिव्यसौख्यप्रदा दीप्तिर्दिक्पालवरदा दशा ।
दावाग्निनाशिनी दूतिर्दैवदुःखविनाशिनी ॥ ६६॥

धर्मदा धनदा धारा धराधरा धनुर्धरा ।
धेनुका ध्वजिनी धीरा धूलिर्ध्वान्तहरा ध्वनिः ॥ ६७॥

ध्येया ध्याना ध्यानशीला धूतपापा धुरन्धरा ।
धृतिर्धूर्धार्मिकी धुर्या धनधान्यविवर्धिनी ॥ ६८॥

धर्मिष्ठा धर्मफलदा ध्यानगम्या च धारणा ।
धरणिर्धवला नीतिर्निष्ठा नाकगतिप्रदा ॥ ६९॥

नागरूपा नागवल्ली नीला नागेन्द्रपूजिता ।
नारसिंही नदी नन्दा नन्द्यावर्तप्रिया तथा ॥ ७०॥

निधिर्निधिपुरस्था च न्यायसून्यायकोविदा ।
नाभिस्तुता नयवती नरकार्तिहरी तथा ॥ ७१॥

नाभिर्नासा नूतनाङ्गा नरकघ्नी तथा नुतिः ।
नागपाशधरा नित्या नानामङ्गलदायिनी ॥ ७२॥

नारी नारायणी नौका नीलमेघसमप्रभा ।
नटी नीलाम्बरा नक्रपोथिनी नलिनी नतिः ॥ ७३॥

निशुम्भघ्नी नर्मदा च नक्षत्राख्या च नन्दिनी ।
पद्मिनी पद्मकोशाक्षी पुण्डलीकवरप्रदा ॥ ७४॥

पुराणपरमा प्रीतिः प्रेष्ठा पीताम्बरा परा ।
पुण्या प्रज्ञा पयोष्णी च पम्पा पद्मा पयस्विनी ॥ ७५॥

पीवरा पुरुषा पुष्टिः परमात्मस्वरूपिणी ।
पापघ्नी प्रियकर्त्रीच पवित्रा परमेश्वरी ॥ ७६॥

पुत्रिणी परमानन्दा पद्महस्ता पिकस्वरा ।
पुरुषार्थप्रदा प्रौढा प्राप्तिः पर्वतनन्दिनी ॥ ७७॥

पतिव्रता पतिमयी प्रिया च प्रीतिमञ्जरी ।
पातालवासिनी पूर्तिः पाञ्चाली प्राणिनां प्रसूः ॥ ७८॥

पराशक्तिः पाशहस्ता प्रसिद्धा पद्मजार्चिता ।

प्रवरातीरसंस्था च पुत्रपौत्रप्रदायिनी ॥ ७९॥

पितामही पितृमाता प्राची पूर्णा परात्मिका ।
परापवादसंहन्त्री पतगेन्द्रकृतासना ॥ ८०॥

पतगेन्द्रशया पाकहन्त्री च परशुप्रिया ।
फणिमाता च फलदा फलभुक् फेनदैत्यहृत् ॥ ८१॥

फुल्लाम्बुजासना फुल्ला फुल्लपद्मकरा बलिः ।
बलिदा बालिका बाला बदरी बलशालिनी ॥ ८२॥

बलभद्रप्रिया बुद्धिर्बाहुदा बलिसंस्तुता ।
बालेन्दुशिखरा बन्दी बालग्रहविनाशिनी ॥ ८३॥

ब्राह्मी बृहत्तमा बाणा ब्रह्माणी ब्रह्मणस्पतिः ।
बृहद्भानुर्ब्रह्मरूपा ब्रह्मस्था च बृहस्पतिः ॥ ८४॥

बालसौख्यप्रदा लीला बाणासुरकरापहा ।
बलिमाता बृहद्धाम्नी बादरायणसंस्तुता ॥ ८५॥

भयघ्नी भीमरूपा भीर्भूतस्था भीमनन्दिनी ।
भूतिर्भवानी भयदा भीषणा भवभीषणा ॥ ८६॥

भूपतिर्भूधरधरा भूतावेशनिवासिनी ।
भालनेत्रा भैरवी च भूतिदा भ्रामरी भ्रमिः ॥ ८७॥

भूर्भुवःस्वः स्वरूपा च भीमा भवभयापहा ।
भीमभ्राजन्मणिग्रीवा भ्रातृपूज्या च भार्गवी ॥ ८८॥

भ्राजिष्णुर्भासुरा भास्या भानुकोटिसमप्रभा ।
भक्तिगम्या भ्रमघ्नी च भक्तकामदुहा च भूः ॥ ८९॥

भवभीतिहरा भव्या भ्रान्तिर्भगवती मही ।
महालक्ष्मीर्महाकाली महिषासुरघातिनी ॥ ९०॥

मत्तमातङ्गगमना मधुसूदनरूपिणी ।
मधुप्रिया मधुरवाङ्मधुघ्नी मथुरा मधुः ॥ ९१॥

मालतीकुसुमारामा मदमन्थरगामिनी ।
मातङ्गी मानदा माता मातृमण्डलवासिनी ॥ ९२॥

माया मान्यापुरी मुख्या मोक्षदा मीनरूपिणी ।
मन्दारभूधरधरा मन्दारस्रग्धरा मखिः ॥ ९३॥

मातामही मातृमाता मध्यमा मानसी मनुः ।
मेनकामुन्महेज्या च मोहिनीमन्त्रदेवता ॥ ९४॥

मधुस्रवा मतिर्मेधा मनीषा मृत्युमारिका ।
मृगत्वञ्मा मृगाक्षी च मोहहन्त्री मनस्विनी ॥ ९५॥

मनेप्सितप्रदा माता मदहृन्मदिरेक्षणा ।
यमुना यमभीतिघ्नी यमलार्जुनमध्यगा ॥ ९६॥

यमलोकहरा याम्या योगिनी यमला यतिः ।
यन्त्रोद्धारवती यात्रा योगनिद्रा यमप्रिया ॥ ९७॥

यशस्विनी योगिगम्या योग्या योगिजनप्रिया ।
योगाङ्गध्यानशीला च यज्ञभूर्यज्ञवर्धिनी ॥ ९८॥

योगपट्टधरा यज्ञा यज्ञाङ्गा यज्ञकामदा ।
यज्ञरूपा यज्ञकर्त्री यत्तत्पदनिबन्धिनी ॥ ९९॥

यशोदा यादवी यूतिर्युद्धज्ञा यदुवंशजा ।
यादवार्तिहरा युक्ता यक्षिणी यवनार्दिनी ॥ १००॥

रक्ताम्बरधरा रक्ता रक्तबीजवधोद्यता ।
रमणी राममूर्तिश्च रागिणी रक्तदन्तिका ॥ १०१॥

रतिप्रिया रतिकरी रक्तकेशी रणप्रिया ।
रक्तकेयूरवलया रतिरागविवर्धिनी ॥ १०२॥

रोलम्बपूर्णमाला च रमणीया रमापतिः ।
राका राकेशवदना रम्या रणितनूपुरा ॥ १०३॥

रक्षोघ्नी रतिदात्री च रागज्ञा रागवल्लभा ।
रत्नगर्भा रत्नखवी राक्षसी रजनीप्रिया ॥ १०४॥

रात्री राजीवनेत्रा च रणभूमी रणस्थिरा ।
लक्ष्मीर्लावण्यरूपा च ललिता लोललोचना ॥ १०५॥

लीलावती लक्षरूपा लङ्का च लवणोदधिः ।
लङ्केशहन्त्री लेखा च लङ्काराज्यप्रदा लता ॥ १०६॥

लीला लीलानरवपुर्लोला लक्ष्या लसत्तनुः ।
लवणासुरसंहन्त्री लेख्या लावण्यभूर्लिपिः ॥ १०७॥

लक्ष्मणा लक्षणाढ्या च लोलार्कपरिपूजिता ।
वरेण्या वसुधा वीरा वरिष्ठा च वरप्रदा ॥ १०८॥

वामना वैदिकी विद्युद्वाराही वेत्रवत्यपि ।
विश्वेशा वीरमाता च वीरश्रीर्वैष्णवी विभुः ॥ १०९॥

वेदिर्वेद्या वेदिता च विष्णुमाया वसुन्धरा ।
व्योमहन्त्री विश्वरूपा विद्या वाग्विश्ववेदिता ॥ ११०॥

वृद्धिर्वृत्तिर्वरा विश्वा व्योमरूपा वषड्कृतिः ।
वनमालाधरा व्याप्तिर्विख्याता विमला वसुः ॥ १११॥

व्यालरूपा वैद्यविद्या वासिष्ठी वीर्यदायिनी ।
वाताली वारूणी विष्वक्सेना वाचस्पतिर्वधूः ॥ ११२॥

विरिञ्चिजननी वेदमाता वह्निस्वरूपधृक् ।
वागुरा वधुरूपा च वालिहन्त्री वराप्सरा ॥ ११३॥

शाम्भवी शम्भुजननी शम्बरासुरघातिनी ।
शाम्बरी शमनी शान्तिः श्रेष्ठा श्रीर्श्रीकरी शमी ॥ ११४॥

शातकुम्भमयी शक्तिः श्यामा शीलवती शिवा ।
शालग्रामशिला शीता श्रीनिधिः श्रीमतिः शुभा ॥ ११५॥

शाकम्भरी शुचिः श्रद्धा शोणाक्षी शेषवन्दिता ।
शताक्षी शबला शान्ता शस्ता शोकविनाशिनी ॥ ११६॥

शत्रुमारी शत्रुरूपा शरधन्वधरा श्रुतिः ।
शरदिन्दुप्रभा शिक्षा शतघ्नी शान्तिदायिनी ॥ ११७॥

षण्मातृजननी षष्ठिः षष्टिहायनरूपिणी ।
षडङ्गज्ञा षड्विकाररहिता षोडशी कला ।
सर्वज्ञा सर्वशक्तिश्च सुलभा सरयूः सखी ॥ ११९॥

सुखदा सामगीतिश्च स्मृतिः सत्या समा सती ।
सरणी सुन्दरी सीता सुभद्रा च सरस्वती ॥ १२०॥

सुश्रोणिः सुमुखी सौम्या सुस्पर्शा सुमतिः सुधा ।
स्वच्छन्दा सुभगा साध्वी सुतन्तुः सुप्रभा समित् ॥ १२१॥

सुस्पृष्टा सात्विकी सारी सकलागमपूजिता ।
हंसा हैहयसंहन्त्री हर्षदात्री हरिप्रिया ॥ १२२॥

हविर्हलधरा हन्त्री ह्रीम्बीजा हरवन्दिता ।
हालाहलधरा होरा हयगा हतदानवा ॥ १२३॥

हयग्रीवतनुर्हैमी हंसोज्ज्वलशिरोरुहा ।
हुङ्कारहतदैत्याहिर्हयघ्नी हंसवाहना ॥ १२४॥

हाहागीतप्रिया हावभूमिर्हास्यप्रिया तथा ।
क्षेमङ्करी क्षितिः क्षीरसमुद्रशयना क्षमा ॥ १२५॥

ज्ञेया ज्ञानस्वरूपा च ज्ञानदा ज्ञानदीपिका ॥ १२६॥

॥ ज्ञानदीपिका ॐ नम इति ॥

ब्रह्मा उवाच -
इतीदं जगदम्बायाः स्तोत्रं नारद ते मया ।
दिव्यं महालसाख्यातं विष्णुमूर्तेः सुखप्रदम् ॥ १॥

यश्चेदं पठते नित्यं नरो भक्त्या प्रसन्नधीः ।
त्रिकालमेककालं वा देवीध्यानपरायणः ॥ २॥

चण्डिकायतने धीमाञ्छुचिश्च विजितेन्द्रियः ।
महालसाम्बिका तस्मै प्रयच्छेदीप्सितान्वरान् ॥ ३॥

रवौ षष्ठ्यां चतुर्दश्यामष्टम्यां वा समाहितः ।
जपेन्नवम्यामिष्टार्थं लभते नात्र संशयः ॥ ४॥

मार्गशीर्षे सिते चम्पाषष्ठ्यां देवीं हृदि स्मरन् ।
जपेन्माघे रवौ षष्ठ्यां सप्तम्यां प्रयतो नरः ॥ ५॥

अश्वत्थे राजवश्यार्थी गोष्ठे गोमान्धनी गृहे ।
क्षेत्रे धान्यमभीष्टं स्यात्पुत्रार्थी देवतालये ॥ ६॥

श्रीवृक्षे राज्यकामस्तु रोगघ्नः सूर्यसन्निधौ ।
वाक्कामोऽभिमुखं देव्याः सर्वकामस्तथैव च ॥ ७॥

शारदे नवरात्रे यः कृत्वा नित्यविधिर्व्रती ।
दशावृत्त्या पठेद्धीमान्देव्याराधनतत्परः ॥ ८॥

स्वप्ने मूर्तिं स पश्येद्धि वरदां श्रीमहालसाम् ।
शतावृत्त्या पठन्नेतत्सर्वान्कामानवाप्नुयात् ॥ ९॥

बिल्वपत्राब्जकुसुमैर्जातीचम्पककेतकैः ।
तुलसीमञ्जिरीभिर्वा पूगैरामलकैः शुभैः ॥ १०॥

फलैः पुष्पैस्तथा धान्यैः पूजयेन्नामभिः शुभाम् ।
सुखी गोमान्धनी पुत्री यशस्वी रोगवर्जितः ॥ ११॥

ज्ञातिप्रधानो भूत्वान्ते देवीसायुज्यमाप्नुयात् ।
इति ते स्तोत्रमाख्यातं गुह्याद्गुह्यतरं महत् ॥ १२॥

इदं गोप्यं पवित्रं च धर्म्यं धन्यं सुमङ्गलम् ।
मातृकाक्रमसाहस्रं सर्वनामसुदुर्लभम् ॥ १३॥

इति भविष्योत्तरपुराणे ब्रह्मनारदसंवादे महालसासहस्रनामस्तोत्रं सम्पूर्णम् ।

---

*Shri Mahalasa Sahasranamavali Stotram*
pdf was typeset on December 25, 2021

Please send corrections to *sanskrit@cheerful.com*